त्वरिः, स्त्री, ( त्वरणमिति। त्वर+भावे इन्। ) त्वरा। इति हेमचन्द्रः। २। २३६ ॥

त्वरितं, क्ली, ( त्वर+क्तः। ) शीघ्रम्। ( त्वरते स्मेति। त्वर+गत्यार्थाकर्म्मकेति कर्त्तरि क्तः। यद्वा, त्वरा सञ्जातास्य। त्वरा+तारकादित्वात् इतच्। ) तद्विशिष्टे, त्रि। इत्यमरः।३।१।६८॥ ( यथा, पञ्चतन्त्रे। ३। १०२।
"वक्रान्तराययुक्तस्य धर्म्मस्य त्वरिता गतिः ॥")

त्वरितोदितं, त्रि, ( त्वरितं शीघ्रं यथा तथा उदितं कथितम्। ) शीघ्रोच्चारितवचः। तत्पर्य्यायः। निरस्तम् २। इत्यमरः। १। ६। २० ॥

त्वष्टः, त्रि, (त्वक्ष्यते तनूक्रियते स्मेति। त्वक्ष तनूकरणे+क्तः।) तनूकृतः। चाँचा छोला इत्यादि भाषा। तत्पर्य्यायः। तष्टः २। इत्यमरः। ३। ११। ६६ ॥

त्वष्टा, [ ऋ ] पुं, ( त्वेषति दीप्यतीति। त्विष दीप्तौ+"नप्तृनेष्टृत्वष्टृहोत्रिति।" उणां ।२।६६। इति तृच् इतोऽत्वञ्च। ) आदित्यविशेषः। ( यथा, महाभारते। १। ६५। १४-१५।
"अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः।
ये राजन्नामतस्तांस्ते कीर्त्तयिष्यामि भारत ! ॥
धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा।
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ॥"
एते तु चाक्षुषस्य मनोरन्तरे तुषिता नाम देवा आसन् वैवस्वतेऽन्तरे तु द्वादश आदित्याः। इति विष्णुपुराणे। १। १५। १३१—१३३ ॥ तथा मात्स्ये च। ६। ३—५ ॥ त्वक्षति तनूकरोति काष्ठादिकं शिल्पकार्य्यत्वात्। तक्ष+तृच्। ) विश्वकर्म्मा। इति हेमचन्द्रः।३।५८१॥ ( यथा, माघे। ३। ३५।
"त्वष्टुः सदाभ्यासगृहीतशिल्प-
विज्ञानसम्पत्प्रसवस्य सीमा ॥"
अयन्तु माघमासे सूर्य्यरथपरिभ्रमणाधिकारिणामन्यतमः। यथा, विष्णुपुराणे। २। १०। १५।
"त्वष्टाथ जमदग्निश्च कम्बलोऽथ तिलोत्तमा।
ब्रह्मापेतोऽथ ऋतजित् धृतराष्ट्रोऽथ सत्तमः।
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ॥"
विश्वकर्म्मणः पुत्त्रविशेषः। यथा, विष्णुपुराणे। १। १५। १२२।
"तस्य पुत्त्रास्तु चत्वारस्तेषां नामानि मे शृणु।
अजैकपादहिर्ब्रध्नस्त्वष्टा रुद्रश्च बुद्धिमान् ॥"
प्रजापतिविशेषः। यथा, महाभारते ।५।६।३।
"त्वष्टा प्रजापतिर्ह्यासीत् देवश्रेष्ठो महातपाः।
स पुत्त्रं वै त्रिशिरसमिन्द्रद्रोहात् किलासृजत् ॥"
महादेवः। यथा, महाभारते। १३।१७।१०३।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः॥")
वर्णसङ्करजातिविशेषः। इत्यमरः। २ ।१०।६ ॥ अस्य पर्य्यायः। काष्ठतट्शब्दे उत्पत्तिश्च सूत्रधारशब्दे द्रष्टव्या ॥ ( इन्द्रः। इति ऋग्वेदभाष्ये सायनः। १। ११७। २२ ॥ असुरभेदः। इति तत्रैव सायनः। ३। ४८। 3 ॥ )

त्वाचप्रत्यक्षं, क्ली, (त्वाचं त्वक्-सम्बन्धि प्रत्यक्षम्।) स्पर्शज्ञानम्। द्रव्यादेः स्पर्शद्वारा बोधः। यथा, "अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिकाले त्वाचप्रत्यक्षं स्यात्।" इति सिद्धान्तमुक्तावली ॥

त्वाष्टी, स्त्री, दुर्गा। यथा,—
"तुष तुष्टौ स्मृतो धातुस्तस्य तुष्टी निपातने।
सुजत्येषा प्रजास्तुष्टी त्वाष्टी तेन प्रकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥

त्वाष्ट्रः, पुं, ( त्वष्टुरपत्यं पुमान्। अण्। ) वृत्रासुरः। इति त्रिकाण्डशेषः ॥ ( यथा, देवीभागवते। ५। ५। ४।
"उद्यमेन हतस्त्वाष्ट्रो नमुचिर्ब्बल एव च ॥"
विश्वरूपः। यथा, भागवते। ६। ८। ३।
"वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते ॥"
त्वष्टृसम्बन्धिनि, त्रि। यथा, मार्कण्डेये ।२१।८५।
"ततोऽस्त्रं त्वाष्ट्रमादाय चिक्षेप प्रति दान-
वान् ॥"
तथा, भागवते। ६। १४। २७।
"क्षपयित्वा चरुं त्वाष्ट्रं त्वष्टारमजयद्विभुः ॥"
त्वष्टा अधिष्ठात्री देवतास्येति अण्। चित्रानक्षत्रम्। यथा, वृहत्संहितायाम्। ७। ११।
"घोरा श्रवणस्त्वाष्ट्रं वसुदेवं वारुणश्चैव ॥")

त्वाष्ट्री, स्त्री, ( त्वष्टा अधिष्ठा॰ी देवतास्याः। त्वष्टृ+अण्+ङीप्। ) चित्रानक्षत्रम्। इति हेमचन्द्रः ॥ ( त्वष्टुर्विश्वकर्म्मणोऽपत्यं स्त्री। ) संज्ञानामसूर्य्यपत्नी। इति शब्दरत्नावली ॥ (यथा, महाभारते। १। ६६। ३५।
"त्वाष्ट्री तु सवितुर्भार्य्या वड़वा रूपधारिणी।
असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ ॥")
रथिका। क्षुद्ररथः। इति त्रिकाण्डशेषः ॥

त्विट्, [ ष् ] स्त्री, ( त्विष दीप्तौ+सम्पदादित्वात् क्विप्। ) शोभा। ( यथा, महाभारते। ३। २०। २।
"अपश्यं द्वारकाश्चाहं महाराज ! हतत्विषम्॥")
प्रभा। ( यथा, माघे। १। ३।
"चयस्त्विषामित्यवधारितं पुर-
स्ततः शरीरीति विभाविताकृतिम् ॥")
वाक्। इति मेदिनी। षे, १३ ॥ व्यवसायः। जिगीषा। इति विश्वः ॥ ( दीप्यमाने, त्रि। यथा, ऋग्वेदे। ४। १७। २।
"तव त्विषो जनिमन् रेजत द्यौरेजद्भूमिर्भियसा
स्वस्य मन्योः ॥"
"हे इन्द्र त्विषो दीप्यमानस्य तव त्वदीये जनिमन् जन्मनि सति।" इति तद्भाष्ये सायनः ॥)

त्विष, ऋ, ञ भासे। इति कविकल्पद्रुमः ॥ (भ्वां-उभं-दाने-सर्क-अन्यत्र अकं-अनिट्।) ऋौ, अतित्विषत्। ञ, त्वेषति त्वेषते। भासो दीप्तिः। अवासनिवासे दाने च त्विषौ ञ अनुवर्त्तते। ऋौ, अतातिचत्। ञ, अवत्वेषति अवत्वेषते। जनो निवसति ददाति दीप्यते वा इत्यर्थः। इति दुर्गादासः ॥

त्विषा, स्त्री, ( त्विष्+हलन्तात् वा टाप्। ) दीप्तिः। इति शब्दरत्नावली ॥

त्विषाम्पतिः, पुं, ( त्विषां प्रभाणां पतिः। षष्ठ्या अलुक्। ) सूर्य्यः। इत्यमरः। १। ३। ३० ॥

त्विषिः, स्त्री, ( त्विष दीप्तौ+"इगुपधात् कित्।" उणां ४। ११६। इति इन् स च कित्। ) किरणम्। इति हेमचन्द्रः। २। १४ ॥ (यथा, ऋग्वेदे। ६। ७१। ६।
"उच्चेव यूयां परियन्नरावीदधि
त्विषीरधित सूर्य्यस्य ॥")

त्सर, छद्मगतौ। इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सकं च-सेट्। ) दन्त्यवर्गाद्यस्याधोदन्त्यसकारः। त्सरति धूर्त्तः छलेन गच्छतीत्यर्थः। इति दुर्गादासः ॥ ( यथा, अथर्व्ववेदे। ८। ६ : ८।
"यस्त्वा स्वपन्तीं त्सरति यस्त्वा दिप्सति
जाग्रतीम् ॥")

त्सरुः, पुं, ( त्सरति कौटिल्यं गच्छतीति। त्सर+"भृमृशीतॄचरित्सरीति।" उणां १। ७। इति उः। ) खड्गमुष्टिः। इत्यमरः। २। ८। ६० ॥ तत्पर्य्यायः। मुष्टिः २ तालतलः३। इति शब्दरत्नावली ॥ ( यथा, आर्य्यासप्तशत्याम्। २४३।
"ज्योत्स्नाभिसारसमुचितवेशे ! व्याकोष-
मल्लिकोत्तंसे ! ।
विशसि मनो निशितेव स्मरस्य कुसुमत्सरुच्छुरिका ॥"
सर्पः। यथा, ऋग्वेदे। ५। ५०। १।
"मा मां पद्येन रपसा विदत्त्सरुः।"
"तथा त्सरुश्छद्मगामी जिह्मगः सर्प इत्यर्थः मां पद्येन पादभवेन रपसा। रपि शब्दकर्म्मा। शब्देन मा विदत् मा जानातु।" इति तद्भाष्ये सायनः ॥ )

---

# थ

थ, थकारः। स व्यञ्जनषष्ठदशवर्णः। तवर्गद्वितीयवर्णश्च। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम् ॥ ( यथा, शिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥")
अस्य स्वरूपं यथा,—
"थकारं चञ्चलापाङ्गि ! कुण्डली मोक्षरूपिणी।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा।
तरुणादित्यसङ्काशं थकारं प्रणमाम्यहम् ॥"
इति कामधेनुतन्त्रम् ॥
( वङ्गीयवर्णमालायाम् ) अस्य लेखनप्रकारो यथा,—
"कुञ्चिता कुण्डली भूत्वा वामाद्दक्षिणतस्ततः।
वामतः कुञ्चिता भूत्वा दक्षाधोदक्षलो गता ॥
ऊर्द्ध्वं ऋज्वायता रेखा सुरा गङ्गादयः क्रमात्।
वाणी भवानी लक्ष्मीश्च ध्यानमस्य प्रचक्षते ॥"